**तुष्ट** त्रि॰ तुष–कर्त्तरि क्त । १सन्तोषयुक्ते । "तस्मिंस्तुष्टे जगत्तुष्टं प्रीणिते प्रीणितं जगत्" पुरा॰ । २विष्णौ पु॰ "परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः" विष्णुस॰ "परानन्दैकरूपत्वात्तुष्टः" भा॰ । तस्यानन्दरूपत्वेऽपि आनन्दाश्रयत्वं कल्पितम् अतएव विवरणे "आनन्दो विषयानुभवो नित्यत्वञ्च सन्ति धर्मा अपृथक्त्वेऽपि पृथगिवावभासन्ते" इत्युक्तम् । न्यायनये तु दुःखाभावस्यैवानन्दरूपत्वात् तस्य तदाश्रयत्वमस्त्येवेति भेदः ।

**तुष्टि** स्त्री तुष–भावे क्तिन् । १तोषे २भोगेष्वेतावतालमिति बुद्धौ ३अधिगतार्थादन्यत्र तुच्छत्वबुद्धौ "तुष्टिर्नु रक्तार्थस्य कृतार्थोऽस्मीति या मतिः" इत्युक्ते ४बुद्धिभेदे सा च नवविधा इति सांख्याचार्य्याः यथोक्तं सा॰ का॰ त॰ कौ॰ च ।

"तुष्टिर्नवधेत्युक्तं ताः परिगणयति । "आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः । वाह्याविषयोपरमात् पञ्च नव तुष्टयोऽभिमताः" का॰ ।

"प्रकृतिव्यतिरिक्त आत्मास्तीति प्रतिपद्य ततोऽस्य श्रवणमननादिना विवेकसाक्षात्काराय त्वसदुपदेशतुष्टो यो न प्रयतते तस्य चतस्र आध्यात्मिक्यस्तुष्टयो भवन्ति प्रकृतिव्यतिरिक्तमात्मानमधिकृत्य यस्मात्तास्तुष्टयस्तस्मादाध्यात्मिक्यः, कास्ता इत्यत आह प्रकृत्युपादानकालभाग्याख्याः प्रकृत्यादिराख्या यासां तास्तथोक्ताः । तत्र प्रकृत्याख्या तुष्टिर्यथा कस्यचिदुपदेशः (विवेकसाक्षात्कारो हि प्रकृतिपरिणामभेदः तञ्च प्रकृतिरेव करोतीति कृतं ते ध्यानाभ्यासेन, तस्मादेवमेवास्स्वेति)। सेयमुपदेष्टव्यस्य शिष्यस्य प्रकृतौ तुष्टिः प्रकृत्याख्या तुष्टिः अम्भ इत्युच्यते । "या च प्रकृत्यविवेकख्यातिर्न सा प्रकृतिमात्राद्भवति मा भूत्सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात् प्रव्रज्यायास्तु सा भवति तस्मात्प्रव्रज्यामुपाददीथाः कृतं ते ध्यानाभ्यासेनायुष्मन्नित्युपदेशे या तुष्टिः सोपादानाख्या सलिलमुच्यते । 'या तु प्रव्रज्यापि न सद्यो निर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिन्ते विधास्यति अलमुत्तप्ततया तवेत्युपदेशे या तुष्टिः सा कालाख्या मेघ उच्यते । "या तु न कालात् नाप्युपादानाद्विवेकख्यातिरपि तु भाग्यादेव अतएव मदालसापत्यानि अतिबालानि मातुरुपदेशमात्रादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः तत्र भाग्यमेव हेतुर्नान्यदित्युपदेशे या तुष्टिः सा भाग्याख्या तुष्टिरुच्यते । बाह्या दर्शयति बाह्यास्तुष्टयोविषयोपरमात् पञ्च, याः खल्वनात्मनः प्रकृतिमहदहङ्कारादीनात्मेत्यभिमन्यमानस्य वैराग्ये सति तुष्टयस्ता बाह्याः आत्मज्ञानाभावेऽनात्मानमधिकृत्य प्रवृत्तेरिति । ताश्च वैराग्ये सति सम्भवन्ति तुष्टय इति वैराग्यहेतुपञ्चविधत्वाद्वैराग्याण्यपि पञ्च, तत्पञ्चकत्वात् तुष्टयः पञ्चेति, उपरम्यतेऽनेनेत्युपरमो वैराग्यं विषयादुपरमो विषयोपरमः । विषया भोग्याः शब्दादयः पञ्च, उपरमा अपि पञ्च । तथा च अर्ज्जनरक्षणक्षयभोगहिंसादोषदर्शनहेतुजन्मान उपरमाः पञ्च भवन्ति । तथा हि सेवादयो धनोपार्जनोपायास्ते च सेवकादीन् दुःखा कुर्वन्ति । दुष्प्रदुरीश्वरद्वाःस्थदस्तदत्तचण्डार्द्धचन्द्रजां वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्जते । एवमन्येऽप्यर्जनोपाया दुःखा इति विषयोपरमे या तुष्टिः सैषा पारमुच्यते । तथार्जितं धनं राजैकागारिकाग्निजलौघादिभ्यो विनङ्क्ष्यतीति तद्रक्षणे महद्दुःखमिति भावयतो विषयोपरमे या तुष्टिः द्वितीया सुपारमुच्यते । तथा महतायासेनार्जितं धनं भुज्यमानं क्षीयते इति तत्प्रक्षयं भावयतो विषयोपरमे या तुष्टिः सा तृतीया पारपारमुच्यते । एवं शब्दादिभोगाभ्यासाद्वर्द्धन्ते कामास्ते च विषयाप्राप्तौ कामिनं दुःखयन्तीति भोगदोषं भावयतो विषयोपरमे या तुष्टिः सा चतुर्थी अनुत्तमाम्भ उच्यते । एवं नानुपहत्य भूतानि विषयोपभोगः सम्भवतीति हिंसादोषदर्शनाद्विषयोपरमे या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते । एवमाध्यात्मिकीभिश्चतसृभिर्बाह्याभिश्च पञ्चभिर्नव तुष्टयोऽभिमताः" । भाष्यकृता अन्यथा तुष्टिभेदा दर्शिता यथा "तुष्टिर्नवधा" सा सू॰ "आध्यात्मिक्यादिभेदान्नवधा तुष्टिः" भा॰ । "इदं सूत्रं कारिकया व्याख्यातम् । आध्यात्मिक्य इत्यादि अस्यायमर्थः। आत्मानं तुष्टिमतः सङ्घातमधिकृत्य वर्त्तन्त इत्याध्यात्मिक्यस्तुष्टयश्चतस्रः। तत्र प्रकृत्याख्या तुष्टिर्यथा । साक्षात्कारपर्य्यन्तः परिणामः सर्वोऽपि प्रकृतेरेव तं च प्रकृतिरेव करोत्यहं तु कूटस्थः पूर्ण इत्यात्मभावनात् परितोषः । इयं तुष्टिरम्भ इत्युच्यते । ततश्च प्रव्रज्योपादानेन या तुष्टिः सोपादानाख्या सलिलमित्युच्यते । ततश्च प्रव्रज्यायां बहुकालं समाध्यनुष्ठानेन या तुष्टिः सा कालाख्या तुष्टिर्मेघ इत्युच्यते । ततश्च प्रज्ञानपरमकाष्ठारूपे धर्ममेघसमाधौ सति या तुष्टिः सा जलाख्या तुष्टिरित्युच्यत इति चतस्र आध्यात्मिक्यः ।